तिङन्तप्रक्रिया – अभ्यासः २७ – पाठः ४१

एतेषु वाक्येषु स्वादिगणस्य रूपाणि अभिज्ञाय तत्सिद्धिप्रक्रियां प्रदर्शयत –

१. सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।

चिन्वन्ति - लट्लकारः, परस्मैपदी, प्रथमपुरुषः, बहुवचनम्।

चि॒ञ् चयने [१२५१] स्वादिः उभयपदी अनिट्

चि (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

चि लँट् (वर्तमाने लट् (३.२.१२३))

चि ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

चि झि (तिप्तस्झि० (३.४.७८))

चि श्नु झि (स्वादिभ्यः श्नुः (३.१.७३))

चि नु झि (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

चि नु अन्ति (झोऽन्तः (७.१.३))

चिन्वन्ति (हुश्नुवोः सार्वधातुके (६.४.८७))

२. विश्वेशं मां त्रिपदमिह किं याचसे बालिशस्त्वं सर्वां भूमिं वृणु किममुनेत्यालपत्त्वां स दृप्यन्।

वृणु - लोट्लकारः, परस्मैपदी, मध्यमपुरुषः, एकवचनम्।

वृञ् वरणे [१२५४] स्वादिः उभयपदी सेट्

वृ (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

वृ लोँट् (लोट् च (३.३.१६२))

वृ ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

वृ सिप् (तिप्तस्झि० (३.४.७८))

वृ सि (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

वृ हि (सेर्ह्यपिच्च (३.४.८७))

वृ श्नु हि (स्वादिभ्यः श्नुः (३.१.७३))

वृ नु हि (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

वृ नु (उतश्च प्रत्ययादसंयोगपूर्वात् (६.४.१०६))

वृणु (रषाभ्यां नो णः समानपदे (८.४.१), ऋवर्णान्नस्य णत्वं वाच्यम् (९.१.२))

३. क्षिणोतु कामं शीतांशुः किं वसन्तो दुनोति माम् । मलिनाचरितं कर्म सुरभेर्नन्वसाम्प्रतम्॥

क्षिणोतु - लोट्लकारः, परस्मैपदी, प्रथमपुरुषः, एकवचनम्।

क्षि (हिंसायाम्। भाषायामित्येके [१२६२] स्वादिः परस्मैपदी सेट्

क्षि लोँट् (लोट् च (३.३.१६२))

क्षि ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

क्षि तिप् (तिप्तस्झि० (३.४.७८))

क्षि ति (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

क्षि श्नु ति (स्वादिभ्यः श्नुः (३.१.७३))

क्षि नु ति (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

क्षि नो ति (सार्वधातुकार्द्धधातुकयोः (७.३.८४))

क्षि नो तु (एरुः (३.४.८६))

क्षिणोतु (अट्कुप्वाङ्नुमव्यवायेऽपि (८.४.२))

दुनोति - लट्लकारः, आत्मनेपदी, प्रथमपुरुषः, एकवचनम्।

टुदु उपतापे [१२५६] स्वादिः परस्मैपदी अनिट्

दु (आदिर्ञिटुडवः (१.३.५), तस्य लोपः (१.३.९))

दु लँट् (वर्तमाने लट् (३.२.१२३))

दु ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

दु तिप् (तिप्तस्झि० (३.४.७८))

दु ति (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

दु श्नु ति (स्वादिभ्यः श्नुः (३.१.७३))

दु नु ति (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

दुनोति (सार्वधातुकार्द्धधातुकयोः (७.३.८४))

४. स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥

अश्नुते - लट्लकारः, आत्मनेपदी, प्रथमपुरुषः, एकवचनम्।

अशूँ व्याप्तौ सङ्घाते च [१२७०] स्वादिः आत्मनेपदी वेट्

अश् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

अश् लँट् (वर्तमाने लट् (३.२.१२३))

अश् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अश् त (तिप्तस्झि० (३.४.७८))

अश् श्नु त (स्वादिभ्यः श्नुः (३.१.७३))

अश् नु त (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

अश्नुते (टित आत्मनेपदानां टेरे (३.४.७९))

५. स एव भगवान् साक्षाद्विष्णुर्योगेश्वरेश्वरः। जातो यदुष्वित्यश्रृण्म ह्यपि मूढा न विद्महे॥

अश्रृण्म - लङ्लकारः, परस्मैपदी, उत्तमपुरुषः, बहुवचनम्।

श्रु श्रवणे [१००१] भ्वादिः परस्मैपदी अनिट्

श्रु लँङ् (भूते च (३.३.१४०))

श्रु ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अट् श्रु ल् (लुङ्लङ्लृङ्क्ष्वडुदात्तः (६.४.७१))

अश्रु ल् (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अश्रु मस् (तिप्तस्झि० (३.४.७८))

अश्रु म (नित्यं ङितः (३.४.९९))

अश्र् श्नु म (श्रुवः श्र् च (३.१.७४))

अश्र् नु म (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

अश्र् न् म (लोपश्चास्यान्यतरस्यां म्वोः (६.४.१०७))

अश्रृण्म (रषाभ्यां नो णः समानपदे (८.४.१), ऋवर्णान्नस्य णत्वं वाच्यम् (९.१.२))

६. तं त्वां प्रकाशपरमात्मतनुं कथञ्चिच्चित्ते वहन्नमृतमश्रमश्नुवीय।

अश्नुवीय - विधिलिङ्लकारः, आत्मनेपदी, उत्तमपुरुषः, एकवचनम्।

अशूँ व्याप्तौ सङ्घाते च [१२७०] स्वादिः आत्मनेपदी वेट्

अश् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

अश् लिँङ् (विधिनिमन्त्रणाऽमन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् (३.३.१६१))

अश् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अश् इट् (तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (३.४.७८))

अश् इ (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अश् श्नु इ (श्रुवः शृ च (३.१.७४))

अश् नु इ (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

अश् नु इ (सार्वधातुकार्द्धधातुकयोः (७.३.८४), उरण् रपरः (१.१.५१))

अश् नु सीयुट् इ (लिङः सीयुट् (३.४.१०२))

अश् नु सीय् इ (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अश् नु ईय् इ (लिङः सलोपोऽनन्त्यस्य (७.२.७९))

अश् नुवङ् ईय् इ (अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७))

अश् नुव् ईय् इ (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अश् नुव् ईय् अ (इटोऽत् (३.४.१०६))

अश्नुवीय

७. तथेत्युक्त्वा प्राप्नोतु भवानित्याह प्राप्नवानि इतीतरे प्रत्याहुः।

प्राप्नोतु - लोट्लकारः, परस्मैपदी, प्रथमपुरुषः, एकवचनम्।

आ॒पॄँ व्याप्तौ [१२६६] स्वादिः परस्मैपदी अनिट्

आप् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

आप् लोँट् (लोट् च (३.३.१६२))

आप् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप् तिप् (तिप्तस्झि० (३.४.७८))

आप् ति (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप् श्नु ति (स्वादिभ्यः श्नुः (३.१.७३))

आप् नु ति (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

आप् नो ति (सार्वधातुकार्द्धधातुकयोः (७.३.८४))

आप् नो तु (एरुः (३.४.८६))

प्राप्नोतु

प्राप्नवानि - लोट्लकारः, परस्मैपदी, उत्तमपुरुषः, एकवचनम्।

आ॒पॄँ व्याप्तौ [१२६६] स्वादिः परस्मैपदी अनिट्

आप् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

आप् लोँट् (लोट् च (३.३.१६२))

आप् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप् मिप् (तिप्तस्झि० (३.४.७८))

आप् मि (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप् श्नु मि (स्वादिभ्यः श्नुः (३.१.७३))

आप् नु मि (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

आप् नो मि (सार्वधातुकार्द्धधातुकयोः (७.३.८४))

आप् नो नि (मेर्निः (३.४.८९))

आप् नो आट् नि (आडुत्तमस्य पिच्च (३.४.९२))

आप् नो आनि (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप्नवानि (एचोऽयवायावः (६.१.७८)

प्राप्नवानि

८. आप्नुहि श्रेयांसमति समं क्राम।

आप्नुहि - लोट्लकारः, परस्मैपदी, मध्यमपुरुषः, एकवचनम्।

आ॒पॄं व्याप्तौ [१२६६] स्वादिः परस्मैपदी अनिट्

आप् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

आप् लोँट् (लोट् च (३.३.१६२))

आप् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप् सिप् (तिप्तस्झि० (३.४.७८))

आप् सि (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप् हि (सेर्ह्यपिच्च (३.४.८७))

आप् श्नु हि (स्वादिभ्यः श्नुः (३.१.७३))

आप् नु हि (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

आप्नुहि

९. धुन्वन्तु मे विपदमद्रिकुमारिकायाः पादारविन्दकटककणितानि तानि।

धुन्वन्तु - लोट्लकारः, परस्मैपदी, प्रथमपुरुषः, बहुवचनम्।

धु॒ञ् कम्पने [१२५५] स्वादिः उभयपदी अनिट्

धु (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

धु लोँट् (लोट् च (३.३.१६२))

धु ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

धु झि (तिप्तस्झि० (३.४.७८))

धु श्नु झि (स्वादिभ्यः श्नुः (३.१.७३))

धु नु झि (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

धु नु अन्ति (झोऽन्तः (७.१.३))

धु नु अन्तु (एरुः (३.४.८६))

धुन्वन्तु (हुश्नुवोः सार्वधातुके (६.४.८७))

१०. लोके सर्वनृपाश्चैव वीराश्चान्ये धनुर्धराः । एते पार्थं रणे युक्ताः प्रतियोद्धुं न शक्नुयुः ॥

शक्नुयुः - विधिलिङ्लकारः, परस्मैपदी, प्रथमपुरुषः, बहुवचनम्।

शक्लृँ शक्तौ [१२६७] स्वादिः परस्मैपदी अनिट्

शक् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

शक् लिँङ् (विधिनिमन्त्रणाऽमन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् (३.३.१६१))

शक् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

शक् झि (तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (३.४.७८))

शक् श्नु झि (स्वादिभ्यः श्नुः (३.१.७३))

शक् नु झि (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

शक् नु यासुट् झि (यासुट् परस्मैपदेषूदात्तो ङिच्च (३.४.१०३))

शक् नु यास् झि (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

शक् नु या झि (लिङः सलोपोऽनन्त्यस्य (७.२.७९))

शक् नु या जुस् (झेर्जुस् (३.४.१०८))

शक् नु या उस् (चुटू (१.३.७), तस्य लोपः (१.३.९))

शक् नु युस् (उस्यपदान्तात् (६.१.९६))

शक् नु युर् (ससजुषो रुः (८.२.६६))

शक्नुयुः (खरवसानयोर्विसर्जनीयः (८.३.१५))

११. तत्र प्रत्यक्षं नाम अक्ष्णोति व्याप्नोति सकलद्रव्यक्षेत्रकालभावानित्यक्षो जीवः।

अक्ष्णोति - लट्लकारः, परस्मैपदी, प्रथमपुरुषः, एकवचनम्।

अक्षूँ व्याप्तौ [१००२] भ्वादिः परस्मैपदी वेट्

अक्ष् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

अक्ष् लँट् (वर्तमाने लट् (३.२.१२३))

अक्ष् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अक्ष् तिप् (तिप्तस्झि० (३.४.७८))

अक्ष् ति (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

अक्ष् श्नु ति (अक्षोऽन्यतरस्याम् (३.१.७५))

अक्ष् नु ति (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

अक्ष् नो ति (सार्वधातुकार्द्धधातुकयोः (७.३.८४))

अक्ष्णोति (रषाभ्यां नो णः समानपदे (८.४.१))

व्याप्नोति - लट्लकारः, परस्मैपदी, प्रथमपुरुषः, एकवचनम्।

आ॒पॄं व्याप्तौ [१२६६] स्वादिः परस्मैपदी अनिट्

आप् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

आप् लँट् (वर्तमाने लट् (३.२.१२३))

आप् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप् तिप् (तिप्तस्झि० (३.४.७८))

आप् ति (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

आप् श्नु ति (स्वादिभ्यः श्नुः (३.१.७३))

आप् नु ति (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

आप् नो ति (सार्वधातुकार्द्धधातुकयोः (७.३.८४))

व्याप्नोति

१२. खड्गवृक्षयोः पुनः येऽप्येते रथकाराः वाशीवृक्षादनहस्ताः मूलात् प्रभृति आ अग्रात् वृक्षान् तक्ष्णुवन्ति ते अपि तयोः लिङ्गम् न उपलभन्ते ।

तक्ष्णुवन्ति - लट्लकारः, परस्मैपदी, प्रथमपुरुषः, बहुवचनम्।

तक्षूँ तनूकरणे [१००३] भ्वादिः परस्मैपदी वेट्

तक्ष् (उपदेशेऽजनुनासिक इत् (१.३.२), तस्य लोपः (१.३.९))

तक्ष् लँट् (वर्तमाने लट् (३.२.१२३))

तक्ष् ल् (उपदेशेऽजनुनासिक इत् (१.३.२), हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

तक्ष् झि (तिप्तस्झि० (३.४.७८))

तक्ष् श्नु झि (तनूकरणे तक्षः (३.१.७६))

तक्ष् नु झि (लशक्वतद्धिते (१.३.८), तस्य लोपः (१.३.९))

तक्ष् नु अन्ति (झोऽन्तः (७.१.३))

तक्ष् नुवङ् अन्ति (अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७))

तक्ष् नुव् अन्ति (हलन्त्यम् (१.३.३), तस्य लोपः (१.३.९))

तक्ष्णुवन्ति (रषाभ्यां नो णः समानपदे (८.४.१))